नवमः पाठः

# स्वामी दयानन्दः



**(आधुनिकभारते समाजस्य शिक्षायाश्च महान् उद्धारकः स्वामी दयानन्दः। आर्यसमाजनामकसंस्थायाः संस्थापनेन एतस्य प्रभूतं योगदानं भारतीयसमाजे गृह्यते। भारतवर्षे राष्ट्रीयतायाः बोधोऽपि अस्य कार्यविशेषः। समाजे अनेकाः दूषिताः प्रथाः खण्डयित्वा शुद्धतत्त्वज्ञानस्य प्रचारं दयानन्दः अकरोत्। अयं पाठः स्वामिनो दयानन्दस्य परिचयं तस्य समाजोद्धरणे योगदानं च निरूपयति।)**

मध्यकाले नाना कुत्सितरीतयः भारतीयं समाजम् अदूषयन्। जातिवादकृतं वैषम्यम्, अस्पृश्यता, धर्मकार्येषु आडम्बरः, स्त्रीणामशिक्षा, विधवानां गर्हिता स्थितिः, शिक्षायाः अव्यापकता इत्यादयः दोषाः प्राचीनसमाजे आसन्। अतः अनेके दलिताः हिन्दुसमाजं तिरस्कृत्य धर्मान्तरणं स्वीकृतवन्तः। एतादृशे विषमे काले ऊनविंशशतके केचन धर्मोद्धारकाः सत्यान्वेषिणः समाजस्य वैषम्यनिवारकाः भारते वर्षे

प्रादुरभवन्। तेषु नूनं स्वामी दयानन्दः विचाराणां व्यापकत्वात् समाजोद्धरणस्य संकल्पाच्च शिखर-स्थानीयः।

स्वामिनः जन्म गुजरातप्रदेशस्य टंकारानामके ग्रामे 1824 ईस्वी वर्षेऽभूत्। बालकस्य नाम मूलशङ्करः इति कृतम्। संस्कृतशिक्षया एवाध्ययनस्यास्य प्रारम्भो जातः। कर्मकाण्डिपरिवारे तादृश्येव व्यवस्था तदानीमासीत्। शिवोपासके परिवारे मूलशङ्करस्य कृते शिवरात्रिमहापर्व उद्बोधकं जातम्। रात्रिजागरणकाले मूलशङ्करेण दृष्टं यत् शङ्करस्य विग्रहमारुह्य मूषकाः विग्रहार्पितानि द्रव्याणि भक्षयन्ति। मूलशङ्करोऽचिन्तयत् यत् विग्रहोऽयमकिञ्चित्करः। वस्तुतः देवः प्रतिमायां नास्ति। रात्रिजागरणं विहाय मूलशङ्करः गृहं गतः। ततः एव मूलशङ्करस्य मूर्तिपूजां प्रति अनास्था जाता। वर्षद्वयाभ्यन्तरे एव तस्य प्रियायाः स्वसुर्निधनं जातम्। ततः मूलशङ्करे वैराग्यभावः समागतः। गृहं परित्यज्य विभिन्नानां विदुषां सतां साधूनाञ्च सङ्गतौ रममाणोऽसौ मथुरायां विरजानन्दस्य प्रज्ञाचक्षुषः विदुषः समीपमगमत्। तस्मात् आर्षग्रन्थानामध्ययनं प्रारभत। विरजानन्दस्य उपदेशात् वैदिकधर्मस्य प्रचारे सत्यस्य प्रसारे च स्वजीवनमसावर्पितवान्। यत्र-तत्र धर्माडम्बराणां खण्डनमपि स चकार। अनेके पण्डिताः तेन पराजिताः तस्य मते च दीक्षिताः।

स्त्रीशिक्षायाः विधवाविवाहस्य मूर्तिपूजाखण्डनस्य अस्पृश्यतायाः बालविवाहस्य च निवारणस्य तेन महान् प्रयासः विभिन्नैः समाजोद्धारकैः सह कृतः। स्वसिद्धान्तानां सङ्कलनाय सत्यार्थप्रकाशनामकं ग्रन्थं राष्ट्रभाषायां विरच्य स्वानुयायिनां स महान्तमुपकारं चकार। किञ्च वेदान् प्रति सर्वेषां धर्मानुयायिनां ध्यानमाकर्षयन् स्वयं वेदभाष्याणि संस्कृतहिन्दीभाषयोः रचितवान्। प्राचीनशिक्षायां दोषान् दर्शयित्वा नवीनां शिक्षां पद्धतिमसावदर्शयत्। स्वसिद्धान्तानां कार्यान्वयनाय 1875 ईस्वी वर्षे मुम्बईनगरे आर्यसमाजसंस्थायाः स्थापनां कृत्वा अनुयायिनां कृते मूर्तरूपेण समाजस्य संशोधनोद्देश्यं प्रकटितवान्।

सम्प्रति आर्यसमाजस्य शाखाः प्रशाखाश्च देशे विदेशेषु च प्रायेण प्रतिनगरं वर्तन्ते। सर्वत्र समाजदूषणानि शिक्षामलानि च शोधयन्ति। शिक्षापद्धतौ गुरुकुलानां डी० ए० वी० (दयानन्द एंग्लो वैदिक) विद्यालयानाञ्च समूहः स्वामिनो दयानन्दस्य मृत्योः (1883 ईस्वी) अनन्तरं प्रारब्धः तदनुयायिभिः। वर्तमानशिक्षापद्धतौ समाजस्य प्रवर्तने च दयानन्दस्य आर्यसमाजस्य च योगदानं सदा स्मरणीयमस्ति।

## शब्दार्थाः

| | | | | |
|---|---|---|---|---|
| अदूषयन् | - | दूषितं कृतवन्तः | - | दूषित किया |
| वैषम्यम् | - | असमानता | - | विषमता |

| | | | | |
|---|---|---|---|---|
| गर्हिताः | - | निकृष्टा | - | निन्दित |
| निवारकाः | - | अपहारकाः | - | दूर करनेवाले |
| नूनम् | - | अवश्यम् | - | निश्चय |
| विग्रहम् | - | मूर्त्तिम् | - | मूर्त्ति (प्रतिमा) |
| अकिञ्चित्करः | - | तुच्छः | - | साधारण |
| विहाय | - | त्यक्त्वा | - | छोड़कर |
| अनास्था | - | उदासीनता | - | आस्था का अभाव (तटस्थता) |
| परित्यज्य | - | विहाय | - | छोड़कर |
| प्रज्ञाचक्षुषः | - | अन्धस्य | - | अन्धे का |
| दीक्षिताः | - | दीक्षां प्राप्ताः | - | दीक्षित |
| सम्प्रति | - | अधुना | - | इस समय |
| अनन्तरम् | - | पश्चात् | - | बाद में |

## व्याकरणम्

### सन्धिविच्छेदः

| | | |
|---|---|---|
| इत्यादयः | - | इति + आदयः |
| धर्मान्तरम् | - | धर्म + अन्तरम् |
| धर्मोद्धारकाः | - | धर्म + उद्धारकाः |
| सत्यान्वेषिणः | - | सत्य + अन्वेषिणः |
| प्रादुरभवन् | - | प्रादुः + अभवन् |
| संकल्पाच्च | - | संकल्पात् + च |
| वर्षेऽभूत् | - | वर्षे + अभूत् |
| एवाध्ययनस्यास्य | - | एव + अध्ययनस्य + अस्य |
| तादृश्येव | - | तादृश्य + एव |
| शिवोपासके | - | शिव + उपासके |
| विग्रहार्पितानि | - | विग्रह + अर्पितानि |

मूलशङ्करोऽचिन्तयत् - मूलशङ्करः + अचिन्तयत्

विग्रहोऽयम् - विग्रहः + अयम्

स्वसुर्निधनम् - स्वसुः + निधनम्

साधूनाञ्च - साधूनाम् + च

रममाणोऽसौ - रममाणः + असौ

स्वजीवनमसावर्पितवान् - स्वजीवनम् + असौ + अर्पितवान्

समाजोद्धारकैः - समाज + उद्धारकैः

पद्धतिमसावदर्शयत् - पद्धतिम् + असौ + अदर्शयत्

संशोधनोद्देश्यम् - संशोधन + उद्देश्यम्

विद्यालयानाञ्च - विद्यालयानाम् + च

**प्रकृतिप्रत्ययविभागः**

जातम् - जन् + क्त

आरुह्य - आ + रुह् + ल्यप्

दृष्टम् - दृश् + क्त

गतः - गम् + क्त

जाता - जन् + क्त + टाप्

समागतः - सम + आ + गम् + क्त

परित्यज्य - परि + त्यज् + ल्यप्

अगमत् - गम्, लुङ् (प्रथमपुरुषः, एकवचनम्)

प्रारभत - प्र + आ + रभ् + लङ् (प्रथमपुरुषः, एकवचनम्)

चकार - कृ + लिट् (प्रथमपुरुषः, एकवचनम्)

विरच्य - वि + रच् + ल्यप्

कृत्वा - कृ + त्वा

प्रारब्धः - प्र + आ + रभ् + क्त

स्मरणीयम् - स्मृ + अनीयर्

दर्शयित्वा - दृश् + णिच् + क्त्वा

**समासः**

कुत्सितरीतयः - कुत्सिताश्च ताः रीतयः, कर्मधारयः

अव्यापकता - न व्यापकता, नञ् समासः

धर्मान्तरणम् - धर्मस्य अन्तरणम् (परिवर्तनम्), षष्ठी तत्पुरुषः

धर्मोद्धारकाः - धर्मस्य उद्धारकाः, षष्ठी तत्पुरुषः

सत्यान्वेषिणः - सत्यस्य अन्वेषिणः, षष्ठी तत्पुरुषः

वैषम्यनिवारकाः - वैषम्यस्य निवारकाः, षष्ठी तत्पुरुषः

शिवोपासकः - शिवस्य उपासकः, षष्ठी तत्पुरुषः

रात्रिजागरणकालः - रात्रौ जागरणं, तस्य कालः, षष्ठी तत्पुरुषः

विग्रहार्पितानि - विग्रहे अर्पितम्, तानि, सप्तमी तत्पुरुषः

अकिञ्चित्करः - न किञ्चित् कर्तुं समर्थः, नञ् तत्पुरुषः

मूर्त्तिपूजा - मूर्तेः पूजा, षष्ठी तत्पुरुषः

धर्माडम्बरः - धर्मस्य आडम्बरः, षष्ठी तत्पुरुषः

समाजदूषणनि - समाजस्य दूषणानि, षष्ठी तत्पुरुषः

शिक्षापद्धति - शिक्षायाः पद्धतिः, षष्ठी तत्पुरुषः

प्रज्ञाचक्षुषः - प्रज्ञा चक्षुःयस्य तस्य (अन्धस्य) षष्ठी तत्पुरुषः

जातिवादकृतम् - जातिवादेन कृतम्, तृतीया तत्पुरुषः

संस्कृतशिक्षा - संस्कृतस्य शिक्षा, षष्ठी तत्पुरुषः

## अभ्यासः
### ( मौखिकः )

1. स्वामिनः दयानन्दस्य विषये द्वे वाक्ये वदत।
2. अधोलिखितानां समस्तपदानां विग्रहं वदत -

   धर्मोद्धारकः, सत्यान्वेषी, वैषम्यनिवारकः, शिखरस्थानीयः, संस्कृतशिक्षा
3. सन्धिविच्छेदं कुरुत -

   संकल्पाच्च, धर्मान्तरम्, समाजोद्धरणस्य, सत्यान्वेषिणः, विग्रहार्पितानि
4. पञ्च अव्ययपदानि वदत।

## अभ्यासः
### ( लिखितः )

1. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत -

   (क) मध्यकाले काः भारतीयं समाजम् अदूषयन् ?

   (ख) के हिन्दुसमाजं तिरस्कृत्य धर्मान्तरणं स्वीकृतवन्तः ?

   (ग) स्वामिनः दयानन्दस्य जन्म कुत्र अभवत् ?

   (घ) विग्रहार्पितानि द्रव्याणि के भक्षयन्ति ?

   (ङ) रात्रिजागरणं विहाय मूलशङ्करः कुत्र गतः ?
2. निम्नलिखितानां पदानां सन्धिविच्छेदं कुरुत –

   एवाध्ययनस्यास्य, विग्रहमारुह्य, वर्षेऽभूत्, स्वजीवनमसावर्पितवान्, समाजोद्धारकैः, विद्यालयानाञ्च।
3. अधोलिखितवाक्येषु कोष्ठात् समुचितं पदमादाय रिक्तस्थानानि पूरयत –

   (क) स्वामी दयानन्दः ........................ आसीत्। (समाजोद्धारकः / कृषकः)

   (ख) बालकस्य नाम ........................ इति कृतम्। (मूलविष्णुः / मूलशङ्करः)

   (ग) शङ्करस्य विग्रहमारुह्य ............... विग्रहार्पितानि द्रव्याणि भक्षयन्ति। (खगाः / मूषकाः)

(घ) रात्रिजागरणं विहाय मूलशङ्करः ………………… गतः। (गृहम् / विद्यालयम्)

(ङ) स्वामी दयानन्दः ……………… संस्थापकः आसीत्। (आर्यसमाजस्य / सिखसमाजस्य)

4. निम्नलिखितानां पदानां प्रकृतिप्रत्ययविभागं कुरुत –

दर्शयित्वा, विरच्य, परित्यज्य, स्मरणीयम्, दृष्टम्, कृतम्, गतः

5. कोष्ठकस्थेभ्यः धातुभ्यः उचितप्रत्ययं योजयित्वा रिक्तस्थानानि पूरयत –

(क) प्राचीनसमाजे अनेके दोषाः …………………। (अस्)

(ख) तस्य जन्म 1824 ईस्वी वर्षे ………………… । (भू)

(ग) बालकस्य नाम मूलशङ्करः इति ………………… । (कृ)

(घ) दयानन्दस्य योगदानं सदा …………………। (स्मृ)

(ङ) ततः मूलशङ्करे वैराग्यभावः ………………… । (गम्)

6. अधोलिखितानां पदानां संस्कृतवाक्येषु प्रयोगं कुरुत –

मूषकः, विद्वान्, धर्मोद्धारकः, अगच्छत्, सह

7. निम्नलिखितानां पदानां विपरीतार्थकपदानि लिखत –

विद्वान्, दोषः, पराजितः, अनास्था, उपकारम्, प्रारम्भः, गर्हितः, वैषम्यम्

8. अधोलिखितेषु पदेषु धातुयुक्तम् उचितं प्रत्ययं निर्दिशत –

(क) गतः - गम् + ……………… (घञ् / क्तः)

(ख) गत्वा - गम् + ……………… (ल्युट् / क्त्वा)

(ग) गमनीयम् - गम् + ……………… (अनीयर् / ल्यप्)

(घ) उपगम्य - गम् + ……………… (ल्यप् / क्त्वा)

(ङ) गन्तुम् - गम् + ……………… (यत् / तुमुन्)

9. अधोलिखितानि रेखाङ्कितपदानि बहुवचने परिवर्तयत –

(क) सः ग्रन्थं विरच्य महान्तम् उपकारम् अकरोत्।

(ख) सः प्राचीनशिक्षायां दोषम्ः अदर्शयत्।

(ग) सः गृहम् अपश्यत्।

(घ) तत्र देवः पूजितः।

(ङ) सः खगं पश्यति।

**10. अधोलिखितं रेखाङ्कितपदमनुसृत्य प्रश्ननिर्माणं कुरुत –**

(क) मध्यकाले धर्मकार्येषु आडम्बरः आसीत्।

(ख) तत्र विधवानां स्थितिः गर्हिता अस्ति।

(ग) बालकस्य नाम मूलशङ्करः आसीत्।

(घ) मूलशङ्करः मेधावी आसीत्।

(ङ) आर्यसमाजस्य शाखाः देशे विदेशेषु च वर्तन्ते।

(च) मूलशङ्करस्य मूर्तिपूजां प्रति अनास्था जाता।

(छ) गृहं परित्यज्य सः गतः।

**11. अधोलिखितेषु पदेषु प्रयुक्तां विभक्तिं लिखत –**

सत्यान्वेषिणः, विधवानाम्, विषमे, धर्मोद्धारकाः, तेषु, प्रतिमायाम्, वैदिकधर्मस्य, संस्कृतेन।

## योग्यताविस्तारः

**आर्यसमाजस्य मूलोद्देश्यानि सन्ति -**

1. विश्वकल्याणम्
2. ज्ञानज्योतिर्विस्तारः
3. ईश्वरस्य सर्वोच्चता, सर्वज्ञता - सर्वज्ञानमयो हि सः।
4. वेदानां प्रचारः प्रसारश्च।
5. कर्त्तव्याकर्त्तव्यज्ञानम्
6. सर्वजनसमरूपता
7. परहितम्
8. सत्यस्य ग्रहणम् असत्यस्य त्यागश्च

'आर्य'- शब्दस्य अर्थः अस्ति -

ABDIEL SOLUTIONS ABSOL PATNA

आर्यावर्तवासी, सभ्यः, श्रेष्ठः, सम्मान्यश्च।

'योऽहमार्येण परवान् भ्रात्रा ज्येष्ठेन भामिनि' (रामायणम्, द्वितीयं काण्डम्)

'स्मृति'- ग्रन्थानुसारम् -

कर्त्तव्यमाचरन् काममकर्त्तव्यमनाचरन्।

तिष्ठति प्राकृताचारे स तु आर्य इति स्मृतः॥

विभिन्नैः धार्मिकचिन्तकैः सह दयानन्दस्य सम्पर्कः जातः।

यथा-

देवेन्द्रनाथ ठाकुरः, केशवचन्द्र सेनः (ब्रह्मसमाजः)

मैडम ब्लौवाट्स्की तथा कर्नल आलकॉटः (थियोसॉफिकल सोसाइटी)

भोलानाथ साराभाई (प्रार्थनासमाजः)

सर सैयदः (संशोधितः इस्लामः) च।